19E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : जानेवारी – २०२३**

**सत्र १ ले**

**विषयः पञ्चतन्त्र–काकोलूकीय** (19E414)

**दिनांक :०५/०१/२०२३** **गुण :८०** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ द्वयोरनुवादं कुरुत।** **(२२)**

१) कस्मिंश्चिदधिष्ठाने मित्रशर्मा नाम ब्राह्मणः कृताग्निहोत्रपरिग्रहः प्रतिवसति स्म। तेन कदाचिन्माघमासे सौम्यानिले प्रवाति मेघाच्छादिते गगने मन्दं मन्दं प्रवर्षति पर्जन्ये पशुप्रार्थनाय कश्चिद् ग्रामान्तरङ्गत्वा कश्चिद्यजमानो याचितः –भो यजमान आगामिन्याममावस्यायामहं यक्ष्यामि यज्ञं, तद्देहि मे पशुमेकम्। अथ तेन तस्य शास्त्रोक्तः पीवरतनुः पशुः प्रदत्तः सोऽपि तमसमर्थमितश्चेतश्च गच्छन्तं विज्ञाय स्कन्धे कृत्वा सत्वरं स्वपुराभिमुखं प्रतस्थे। अथ तस्य गच्छतो मार्गे त्रयो पीवरं पशुं स्कन्धे क्षुत्क्षामकण्ठाः संमुखाः बभूवुः। तैश्च तादृशं पीवरं पशुं स्कन्धे आरूढमवलोक्य मिथोऽभिहितम् अहो, अस्य पशोर्भक्षणादद्यतनीयो हिमपातो व्यर्थतां नीयते।

२) यः करोति नरः पापं न तस्यात्मा ध्रुवं प्रियः। आत्मना हि कृतं पापमात्मनैव हि भुज्यते।।
सोऽहं पापमतिश्चैव पापकर्मरतः सदा। पतिष्यामि महाघोरे नरके नात्र संशयः।।
नूनं मम नृशंसस्य प्रत्यादर्शः प्रदर्शितः। प्रयच्छता स्वमांसानि कपोतेन महात्मना।।
अद्यप्रभृति देहं स्वं सर्वभोगविवर्जितम्। तोयं स्वल्पं यथा ग्रीष्मे शोषयिष्याम्यहं पुनः।।
शीतवातातपसहः कृशाङ्गो मलिनस्तथा। उपवासैर्बहुविधैश्चरिष्ये धर्ममुत्तमम्।।
ततो यष्टिं शलाकां च जालकं पञ्जरं तथा। बभञ्ज लुब्धको दीनां कपोतिञ्ज मुमोच ताम्।।

३) अय लम्बकर्णो गजयूथाधिपसमीपे निरूपितो गतश्च। तथानुष्ठिते लम्बकर्णोऽपि गजमार्गमासाद्यागम्यस्थलमारुह्य तं गजमुवाच - भो भो दुष्टगज, किमेव लीलया निःशङ्कतयात्र चन्द्रह्रद्रे आगच्छसि। तन्नागन्तव्यं, निवर्त्यताम् इति। तदाकर्ण्य विस्मितमना गज आह, भोः कस्त्वम् स आह, अहं लम्बकर्णो नाम शशकश्चन्द्रमण्डले वसामि। साम्प्रतं भगवता चन्द्रमसा तव पार्श्वे प्रहितो दूतः। जानात्येव भवान् यथार्थवादिनो दूतस्य न दोषः करणीयः। दूतमुखा हि राजानः सर्व एव। उक्तश्च–
उद्यतेष्वपि शस्त्रेषु बन्धुवर्गवधेष्वपि।परुषाण्यपि जल्पन्तो वध्या दूता न भूभुजा।।

**प्र.२ ससन्दर्भं स्पष्टीकरणं लिखत। (कान्यपि चत्वारि)** **(२४)**

१. चौरेण जीवितं दत्तं राक्षसेन तु गोयुगम्।
२. बिलस्य वाणी न कदापि मे श्रुता।
३. बहवो न विरोद्धव्या दुर्जयो हि महाजनः।
४. स्वजातिं मूषिका प्राप्ता स्वजातिर्दुरतिक्रमा।
५. दग्धां गृहां पश्य उलूकपूर्णां काकप्रणीतेन हुताशनेन।
६. राजा च मन्त्री च सर्वं वै मूर्खमण्डलम्।

**प्र.३. कामप्येकां कथा संस्कृतेन लिखत।** **(१५)**

**प्र.४. माध्यमभाषया टिप्पण्यौ लिखत। (केऽपि द्वे)** **(१०)**

१. पञ्चतन्त्रस्य पूर्वपीठिका। २. पञ्चतन्त्रस्य रचियता। ३. पञ्चतन्त्रे वर्णितम् षाड्गुण्यम्

**प्र.५वा अ) व्याकुरुत।** **(०९)**

१. सर्वे ते दिवान्धाः गुहामध्ये मृताः। (वाक्यम् एकवचने परिवर्तयत।)
२. त्वामेवायं राक्षसः भक्षयितुमिच्छति। (त्वाम् इति सर्वनाम्नः स्थाने ब्राह्मण इति पदं प्रयुज्य वाक्यं पुनर्लिखत)
३. अहं लम्बकर्णो नाम शशकश्चन्द्रमण्डले वसामि। (अहं इत्यस्य कर्तुः स्थाने, त्वं इति कर्तृपदं योजयित्वा वाक्यं पुनर्लिखत।)
४. त्वं चन्द्रह्लदे आगच्छसि। (भवान् इति कर्तृपदं योजयत।)

**आ)** रूपपरिचयं कुरुत। (कानि अपि त्रीणि)

१. मया    २. ज्ञात्वा    ३. तिष्ठति

**इ)** सन्धीन् विघटयत।

१. तच्छ्रुत्वा    २. अतोऽहम्    ३. सहास्ते

----------